महाकृष्णैकरूपस्य महाकालेति लोकभृत् ॥
ततस्तौ लालयामास शङ्करः प्रमथोत्करैः ।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ ॥
प्रवृद्धौ तौ महात्मानौ हरोमाप्रतिपालितौ ।
क्रमाद्गणेशौ कृत्वा तौ हरो द्वारि न्ययोजयत् ॥"

इति कालिकापुराणे ४५ अध्यायः ॥

तस्य वानरमुखत्वकारणं तच्छापेन हरपार्व्वत्योश्चापिमनुष्यजन्मग्रहणं यथा,—

"यदा सा नर्म्मणे याता गौरी स्मरहरान्तिकम् ।
तदा भृङ्गिमहाकालौ द्वाःस्थौ द्वारि प्रतिष्ठितौ ।
नर्म्मावसाने सा देवी मुक्तधम्मिल्लबन्धना ।
निःसृता रतिसङ्केतशालाया जलजानना ॥
तां निःसरन्तीं सहसा तथाभूतामनिन्दिताम् ।
अयोग्यां वीक्षितुं चान्यैर्न्नध्वजन्यते प्रियम् ॥
ददृशतुर्महात्मानौ नातिहृष्टात्ममानसौ ।
भृङ्गी चापि महाकालः प्राप्तकालश्च कोपतः ॥
दृष्ट्वा तौ मातरं दीनौ तदा भूतावधोमुखौ ।
चिन्ताञ्च जग्मतुस्तीव्रां निशश्वसतुरुत्तमम् ॥
तौ पश्यन्तौ तदा देवी ददर्श हिमवत्सुता ।
चुकोप च तदापर्णा वाक्यञ्चैतदुवाच ह ॥
एवम्भूतान्तु मां कस्मादसम्बद्धामपश्यताम् ।
भवन्तौ तनयौ शुद्धौ ह्रीमर्य्यादाविवर्जितौ ॥
तस्मादिमाममर्य्यादां भवन्तौ निरपत्रपौ ।
अकुर्व्वतां ततो भूयाद्भवतोर्जन्म मानुषे ॥
मानुषीं योनिमासाद्य ममावेक्षणदोषतः ।
भविष्यतो भवन्तौ तु शाखामृगमुखौ भुवि ॥
तौ प्राप्तदुःखौ तु तदा विमनस्कौ हरात्मजौ ।
शापं तस्या न सेहाते प्रोचतुश्चेदमद्रिजाम् ॥
नियोजितौ यथा द्वारि महेशेन त्वया सह ।
तथा नियोगं कुर्व्वन्तौ तिष्ठावो द्वारि संयतौ ।
हठान्निःसरणं गेहात्तवैव न हि युज्यते ॥
तस्मात्तत्र प्रतीकारं शृणु मातरनिन्दिते ! ।
त्वं मानुषी क्षितौ भूया हरो भवतु मानुषः ॥
मानुषस्य हरस्यावां जायायां हरतेजसा ।
भवत्याश्चापि मानुष्या भविष्यावस्तथोदरे ॥
अथ काले व्यतीते तु सर्व्वज्ञो वृषभध्वजः ।
तद्भावि कर्म्म ज्ञात्वैव मानुषो ह्यभवत् स्वयम् ॥
ब्रह्मणो दक्षिणाङ्गुष्ठाद्दक्षो ब्रह्मसुतोऽभवत् ।
अदितिस्तत्सुता जाता ततः पूषाक्योऽभवत् ॥
पूष्णः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपार[illegible] ।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति ॥
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ।
शेषे वयसि संप्राप्ते भार्य्याभिस्तिसृभिः सह ॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत् ।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥

ब्रह्मोवाच ।

शृणु पौष्य ! यथा भावी पुत्रस्तव कुलोद्वहः ।
तदहं ते वदिष्यामि भार्य्याभिस्तत् समाचर ॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम ! ।
अजीर्णं बहुले काले प्राप्तेऽपि सुरसं सदा ॥
फलमेतत् समादाय यावत् संवत्सरद्वयम् ।
आराधय महादेवं सुप्रसन्नो भविष्यति ॥
यथा संभाषते भर्गः फलमेतत्तथा भवान् ।
करिष्यति फलं राजन् ! भार्य्याभिस्तिसृभिः सह ॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भीरुभिः ।
हरं यष्टुं समारेभे भक्त्या परमया युतः ॥
स तु वर्षद्वयेऽतीते महादेवो जगत्पतिः ।
पौष्यस्य नृपतेः सम्यक् प्रससादार्थसिद्धये ॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते कृत्वेदं तमुवाच ह ॥

ईश्वर उवाच ।

इदं फलं ब्रह्मदत्तं विभज्य नृपते ! त्रिधा ।
भोजयेस्ताः स्वजायास्त्वं प्रहृष्टः सुस्थमानसः ॥
एकस्या जठरे शीर्षं भार्य्यायास्ते भविष्यति ।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति ।
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति ॥
ततः खण्डत्रयं भूप ! यथास्थानं पृथक् पृथक् ।
योजयिष्यति पश्चात्ते पुत्र एको भविष्यति ॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ।
तत्क्षणात् तत् फलं भूतं त्रिभागं स्वयमेव हि ।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् ॥
तत् फलं नृपशार्दूल ! गर्भाश्चाप्याहिताः शुभाः ।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ।
तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ॥
एकं पिण्डं चकाराशु तत्र पुत्रो व्यजायत ।
तस्य शीर्षे तदा राजन् ! सहजेन्दुकला शुभा ॥
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः ।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रसमप्रभः ॥
एवं तिसृणामम्बानां गर्भे जातो यतो हरः ।
अतस्त्र्यम्बकनामाभूत् प्रथितो देवलोकयोः ॥"

इति कालिकापुराणे ४६ अध्यायः ॥

"अवतीर्णे महादेवे पौष्यजायासु स्वेच्छया ।
मानुषेण प्रमाणेन तेन सम्वत्सरद्वये ।
गिरिजापि ककुत्स्थस्य राज्ञो भार्य्यास्वजायत ॥"

"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः ।
तस्य भार्य्या महाभागा भर्गदेवस्य पुत्रिका ॥
सा मनोन्मथिनी नाम्ना पूजिता पतिवल्लभा ।
पुत्री न विद्यते तस्यास्तदर्थं सा गृहान्तरे ।
निभृतं स्थण्डिलं कृत्वा चण्डिकां समपूजयत् ॥
पूज्यमाना महादेवी चण्डिका राजभार्य्यया ।
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह ॥
सा मनोन्मथिनी देवी सुषुवे तनयां शुभाम् ।
तां दृष्ट्वा हारसंयुक्तां शरज्ज्योत्स्नोपमां शुभाम् ॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत् ॥
तेनैव हारचिह्नेन तस्यां तारावतीति वै ।
नाम्नाकरोत् पिता काले यथोक्ते नृपसत्तम ! ॥
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतैः सह ।
ककुत्स्थः कारयामास समयेऽथ स्वयम्वरम् ।
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम् ॥
इति स्वयं महादेवो मानुषीं योनिमाश्रितः ।
पार्व्वती च स्वयं जाता नरयोनावनिन्दिता ॥
यथा भृङ्गी महाकाल एतयोरभवत् सुतः ।
तथा त्वं शृणु राजेन्द्र ! कथयामि समुद्भवम् ॥
अथोमया समं देवो वियता चन्द्रशेखरः ।
आजगाम तदा गच्छन् प्रासादं प्रति तं नृप ! ॥
दृष्टेऽथ चरन्तीं तामुमायाः सदृशीं गुणैः ।
सर्व्वलक्षणसम्पूर्णां माधवस्येव माधवीम् ॥
तां दृष्ट्वा न्यगदद्देवीं गौरीं वृषभकेतनः ।
इयं ते मानुषी मूर्त्तिः प्रिये ! तारावतीति या ॥
भृङ्गीमहाकालयोस्ते जन्मने विहिता स्वयम् ।
त्वत्तो ह्यनन्यकान्तोऽहं नान्यां गन्तुमिहोत्सहे ॥
त्वमिदानीं स्वयञ्चास्यां मूर्त्यां प्रविश भाविनि ! ।
तत उत्पादयिष्यामि महाकालञ्च भृङ्गिणम् ॥

श्रीदेव्युवाच ।

ममैव मानुषी मूर्त्तिरियं वृषभकेतन ! ।
विशामि तेऽत्र वचनादुत्पादय सुतद्वयम् ॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
ततः सापर्णयाविष्टा देवी तारावती सती ।
कामयानं महादेवं स्वयमेवाभवन्मुदा ॥
कामावसाने तस्यान्तु सद्योजातं सुतद्वयम् ।
अभवन् नृपशार्दूल ! तथा शाखामृगाननम् ॥
ततस्तयोर्नाम चक्रे नारदो वचनान् नृप ! ।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः ॥
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः ।
इति चक्रे तयोर्नाम देवर्षिर्ब्रह्मणः सुतः ॥
अन्यांश्च सर्व्वसंस्कारान्नारदो मुनिसत्तमः ।
चकार क्रमशो वाक्याच्चन्द्रशेखरभूभृतः ॥"

इति कालिकापुराणे ४७ । ४८ । ४९ अध्यायेभ्यः संकलितम् ॥ तस्य जन्मनः प्रकारान्तरं यथा,

वेण उवाच ।

प्रपद्ये देवमीशानं त्वामजं चन्द्रभूषणम् ।
महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥
अथैनमब्रवीद्देवस्त्रैलोक्याधिपतिर्भवः ।
आश्वासनकरस्तस्य वाक्यविद्वाक्यमुत्तमम् ॥
अहो तुष्टोऽस्मि ते राजन् ! स्तवेनानेन सुव्रत ! ।
बहुनात्र किमुक्तेन मत्समीपे वसिष्यसि ॥
उषित्वा सुचिरं कालं मम गात्रोद्भवः पुनः ।
असुरो ह्यन्धको नाम भविष्यसि सुरान्तकृत् ॥
हिरण्याक्षगृहे जन्म प्राप्य वृद्धिं गमिष्यसि ।
पूर्व्वाधर्म्मेण घोरेण वेदनिन्दाकृतेन च ॥
साभिलाषो जगन्मातुर्भविष्यसि यदा तदा ।
देहं शूलेन हत्वा ते पातयिष्यामि साध्विमम् ॥
तत्राप्यकल्मषो भूतः स्तुत्वा मां भक्तितः पुनः ।
प्राप्य गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति स्मृतः ।
मत्सन्निधाने स्थित्वा त्वं ततः सिद्धिं गमिष्यसि ॥"

ततः कालान्तरे अन्धककृतस्तवानन्तरं महादेववाक्यम् यथा,—

"सिद्धोऽसि दानवपते ! परितुष्टोऽस्मि तेऽन्धक ! ।
वरं वरय भद्रं ते यमिच्छसि विनाम्बिकाम् ॥